गणेशकृता गौरीस्तुतिः

गणेशकृता गौरीस्तुतिः

जयांब जय शर्वाणि जय गौरि शिवप्रिये |
जयान्नपूर्णे विमले कालकालप्रियेऽनघे ||39||

जय शैलसुते देवि कमलामललोचने |
जयामरांगनाराध्ये जय कल्याणि शांभवि ||40||

जय मंगलसर्वांगे मंगले सर्वमंगले |
जय मृत्युंजयार्धांगि तुंगसिंहासनाश्रये ||41||

जय भक्तजनानंदप्रदाननियतव्रते |
जय दुर्गे विशालाक्षि जय त्रिपुरभैरवि ||42||

जय वागीश्वरि प्राज्ञे मंगले गौरि चंडिके |
चित्रघंटे जयानंगविजयध्वजमालिके ||43||

जय श्रीविकटागौरि सिद्धेश्वरि नमो नमः | (श्रीविलसद्गौरि)
नमस्ते संकटागौरि शीतलागौरि ते नमः ||44||

वंदिदेवि नमस्तुभ्यं ललिते विश्वबाहुके |
चंदलांब नमस्तुभ्यं नमस्ते भ्रमरांबिके ||45||

ज्ञानप्रसूनांब नमो नमस्ते नमो नमस्ते शिवकामसुंदरि |
नमो नमस्तेऽस्त्वरुणाचलेश्वरि नमो महागौरि नमो नमस्ते ||46||

नमो नमः कल्पलताप्रसूनमालासमाक्रांतपदा रविंदे |
वंदे स्वभक्तेप्सितदानलोले विलासशैले गिरिजे नमस्ते ||47||

नमो नमस्त्वच्चरणारविंदमरंदधाराप्रसरोऽस्तु मूर्ध्नि |
अस्माकमीशानदया यथा स्यात्तथा विधेयं गमनोत्तरं वा ||48||

न स्वापराधेन कृतो विलंबः तमंब संवेदय शंकराय |
कृतापराधानपि बालपुत्रान् अंबा न सा कुप्यति सर्वथांब ||49||

अस्माकमन्यच्छरणं किमस्ति विहाय तावच्छरणं तवांब |
शिवस्य वा तावदुमे ततोऽस्मान् अवावनं भक्तजनस्य कार्यं ||50||

अस्माकमप्यंतकवेरिधीरद्वाराश्रयाणां न भयं कुतोऽपि |
दया विधेया खलु तावदेव त्वत्पादपद्मार्चकतत्पराणां ||51||

विहारकालेषु कदाचिदंब सांबाय तावद्विनिवेदनीयाः |
वयं यथा साधु सुखं प्रपन्नाः शिवप्रसादेन भवत्प्रसादात् ||52||

सा त्वं शिवार्धांगमुमे दया चेदस्मासु तावत्तव तावतापि |
न दुःखलेशोऽपि ततः प्रसन्ने प्रसन्नचित्तान्कुरु सर्वदा नः ||53||

विज्ञापनेयं हृदि सावधानमानंददानप्रवणे तवास्तु |
एतावताऽस्माकमुमासहायसहायतामेति न संशयोऽत्र ||54 ||इति शिवरहस्यांतर्गते गणेशकृता गौरीस्तुतिः संपूर्णा||